M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 2429

Title: Paramarśa Vāda

242
a

242(a)

:	:	Paramarśavāda	: Title
:	:	Not Known	: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
242 : a	:	Incomplete	: Remarks

॥श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ ॥अथानुमितिपरामर्शयोः कार्यकारणभावाप्र
त्यासत्तिः सामानाधिकरण्यं॥ तेन चैकपुरुषीयपरामर्शादिनाप्यन्तरपुरुषांतरीया
नुमित्यापत्तिः॥ तस्य समवायरूपकारणतावच्छेदकसंबंधेन परामर्शविरहात्॥ नवीना
स्तु॥ समानधर्मितावच्छेदकत्वप्रत्यासत्त्या अनुमितिपरामर्शयोः कार्यकारणभावः॥ स
मानाधिकरण्यप्रत्यासत्तिकल्पे एकधर्मावच्छिन्नविशेष्यकपरामर्शकाले तद्धर्मावच्छिन्न
विशेष्यकानुमितिवारणाय धर्मितावच्छेदकानां विशेष्यनिवेशनीयतया धर्मितावच्छे
दकभेदेन कार्यकारणभावबाहुल्यप्रसंगात्॥ मन्मते च समानधर्मितावच्छेदकत्वप्रत्यास
त्त्यैव तादृशातिप्रसंगाभावात्॥ धर्मितावच्छेदकमनिवेश्यैव वह्न्यनुमितित्वावच्छिन्नं प्रति
वह्निव्याप्यवत्तानिर्णयत्वादिना हेतुतायाः कल्पनीयतया न तद्भेदेन कार्यकारणभाव
बाहुल्यं॥ न चैतत्कल्पे वह्निव्याप्यधूमवद्द्रव्यं पर्वतो घटवानित्याकारकपरामर्शकालेप
र्वतो वह्निमानित्याकारकानुमित्यापत्तिः॥ तादृशपरामर्शस्यापि धर्मितावच्छेदकतासं
बंधेन पर्वतत्वेपि सत्त्वादिति वाच्यं॥ वह्निविधेयतानिरूपितविशेष्यतावच्छेदकत्वप्रत्यास
त्त्यानुमितित्वावच्छिन्नं प्रति वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यतावच्छेदकत्वप्रत्या रामः १
सत्त्या परामर्शस्य हेतुत्वकल्पनात्॥ तादृशपरामर्शस्य च तादृशविशेष्यतावच्छेदक
त्वसंबंधेन पर्वतत्वेऽसत्त्वेन तत्र पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नवि
धेयताकानुमितेरुत्पादनासंभवात्॥ न चैतत्कल्पे एकपुरुषीयपरामर्शकालेऽन्यपुरु
षीयानुमितिवारणाय तत्पुरुषीयानुमितौ तत्पुरुषीयपरामर्शत्वेन हेतुताया वाच्या॥ इत्थं
च पुरुषभेदेन कार्यकारणभावबाहुल्यात् लाघवावकाश इति वाच्यं॥ पुरुषापेक्षया वि
षयाणामधिकतया विषयभेदेन कार्यकारणभावबाहुल्यापेक्षया पुरुषभेदेन तद्बाहुल्य
स्यैवोचितत्वात्॥ केचित्तु॥ समवायेन वह्निविधेयकानुमितित्वावच्छिन्नं प्रति समवा
येन॥ विशेष्यतावच्छेदकताप्रत्यासत्त्या वह्निविधेयताकानुमितित्वावच्छिन्नं प्रति च विशे
ष्यतावच्छेदकतासंबंधेन परामर्शत्वेन हेतुता॥ तेनैकपुरुषीयपरामर्शादन्यपुरुषीया
नुमितेरेकधर्मावच्छिन्नविशेष्यकपरामर्शादन्यधर्मावच्छिन्नविशेष्यताकानुमितेर्वा
ऽपत्तिः॥ अथैवमपि चैत्रस्य पर्वतत्वावच्छिन्नविशेष्यताको मैत्रस्य द्रव्यत्वावच्छिन्नविशे
ष्यताकपरामर्शस्तदा चैत्रस्य द्रव्यत्वावच्छिन्नविशेष्यताकानुमितेर्मैत्रस्य पर्वतत्वावच्छि
न्नविशेष्यताकानुमितेश्चापत्तिः॥ समवायेन वह्न्यनुमितिजनकीभूतस्य वह्निव्याप्यवत्ता
ज्ञानस्य समवायेन चैत्रमैत्रयोः विशेष्यतावच्छेदकतासंबंधेन वह्न्यनुमितिजनकीभूतस्य
च तस्य द्रव्यत्वपर्वतत्वयोरुभयोरपि सत्त्वादिति चेन्न॥ एकधर्मावच्छिन्नं प्रकृतपक्षविधप
त्यासत्त्यापत्तः एकधर्मावच्छिन्नस्य हेतुतात्र विलक्षणा या एव सामग्री व्याप्तेरनुपगतत्व
तया तादृशातिप्रसंगाभावात्॥ तथाप्रतिधर्मावच्छिन्ननिष्ठया दृशासंबंधावच्छिन्नकार्य

तानिरूपितस्वावच्छिन्नकारणताघटकसंबंधेन यदधिकरणसंबंधस्य कारणतावच्छेदकवि
शिष्टस्य तद्धर्मावच्छिन्ननिष्ठयातादात्म्यसंबंधावच्छिन्नकार्यतांतरनिरूपितस्वावच्छिन्नकारण
ताघटकप्रत्यासत्त्याधिकरणापत्तेः॥ न तु तादात्म्यसंबंधेन तदधिकरणसंबंधस्य कार्यतावच्छेद
कावच्छिन्नस्य तेन संबंधेनाधिकरणमित्येव सामग्रीव्याप्तिः प्रकृते स्वीकरणीया॥ स्वकारण
तावच्छेदकं॥ न्यपदन्निति स्वजे चैत्रस्य पर्वतत्वावच्छिन्नविशेष्यताकानुमितिरेवोत्पद्यते
॥ वह्न्यनुमितित्वावच्छिन्ननिष्ठसमवायसंबंधावच्छिन्नकार्यतानिरूपितस्वावच्छिन्नकार
णताघटकप्रत्यासत्त्यैव चैव चैत्रात्मप्रत्यासन्नस्य वह्निव्याप्यवत्ताज्ञानत्वावच्छिन्नस्य वह्न्य
नुमितित्वावच्छिन्ननिष्ठविशेष्यतावच्छेदकत्वप्रत्यासत्त्यवच्छिन्नकार्यतांतरनिरूपित
स्वावच्छिन्नकारणताघटकीभूतविशेष्यतावच्छेदकत्वप्रत्यासत्त्यवच्छिन्नाधिकरणता
याः पर्वतत्वे सत्त्वात्॥ तस्य समवायेन चैत्रात्मसंबंधवह्न्यनुमितित्वावच्छिन्ननिरूपित
विशेष्यतावच्छेदकत्वसंबंधावच्छिन्नाधिकरणत्वाव्यापकत्वात्॥ एवं मैत्रस्य द्रव्यत्वा
वच्छिन्नविशेष्यतानुमितिरुत्पद्यते॥ ननु चैत्रादेर्द्रव्यत्वावच्छिन्नविशेष्यताकानुमितिः॥ रामः
समवायेन चैत्राद्यात्मसंबंधस्य व्याप्यवत्ताज्ञानत्वावच्छिन्नस्य विशेष्यतावच्छेदकसंबं २
धेन द्रव्यत्वादावृत्तेः॥ द्रव्यत्वादेः चैत्रादिसमवेतवह्न्यनुमितित्वावच्छिन्ननिरूपितवि
शेष्यतावच्छेदकत्वप्रत्यासत्त्यवच्छिन्नाधिकरणतानियामकत्वाभावादिति॥ तन्तुच्छी

यतादिकमनिवेश्यैव विशेष्यतावच्छेदकत्वप्रत्यासत्त्या कार्यकारणभावकल्पनं संभवती
ति वदंति॥ अत्रेदं चिंतयामः॥ चैत्रस्य वह्निव्याप्यवान् पर्वत इत्येतादृशपरामर्शदशायां त
स्य पर्वतो वह्निमानित्येतादृशासिद्धिसत्त्वेपि पर्वतो वह्निमानित्यनुमित्यापत्तिः॥ समवायेन
चैत्रात्मप्रत्यासन्नस्य वह्निव्याप्यवत्ताज्ञानस्य विशेष्यतावच्छेदकतया पर्वतत्वे सत्त्वात्॥ न
च तत्कारणतावच्छेदकसमवायसंबंधेन कारणाधिकरणे तत्कारणतानिरूपिता या कार्य
ता तदाश्रययत्किंचिद्व्यक्तिनिष्ठतदवच्छेदकसंबंधावच्छिन्नकार्यतांतरनिरूपितकारणता
वच्छेदकीभूतनिखिलधर्मावच्छिन्नविशिष्टत्वस्यापि निवेशनीयतया सिद्ध्यादिकाले नानुमि
त्यापत्तिः॥ तदानीं समवायेन व्याप्यवत्ताज्ञानवतश्चैत्रात्मनः समवायसंबंधावच्छिन्नव्याप्य
वत्तानिर्णयनिष्ठकारणतानिरूपितकार्यतासमानाधिकरणतत्कार्यतावच्छेदकसमवाय
संबंधावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकयावदंतर्गतसिद्ध्यभावत्वावच्छिन्नवि
शिष्टत्वाभावादिति वाच्यं॥ इदानीं पर्वतो वह्निमानित्येतादृशासिद्ध्यभावासत्त्वेपि वह्निव्या
प्यवत्ताज्ञानत्वावच्छिन्नकारणनिरूपितकार्यताश्रयद्रव्यत्वावच्छिन्नविशेष्यकवह्निविषय
कानुमित्यात्मकयत्किंचिद्व्यक्तिनिष्ठसमवायसंबंधावच्छिन्नकार्यतानिरूपितकारणतावच्छे
दकीभूतद्रव्यत्वावच्छिन्नविशेष्यकसिद्ध्यभावत्वघटितनिखिलधर्मावच्छिन्नानां चैत्रात्मनि
सत्त्वात्॥ अथ सिद्धेर्द्रव्यत्वावच्छिन्नविशेष्यकवह्निनिश्चयत्वेन न प्रतिबंधकता॥ किंतु सा

मान्यतो विशेष्यतावच्छेदकतासंबंधेन वह्न्यनुमितित्वावच्छिन्नं प्रतिविशेष्यतावच्छेदकत्वसं
बंधेन वह्निनिर्णयित्वेन प्रतिबंधकता कल्प्यते॥ इत्थं च विशेष्यतावच्छेदकत्वप्रत्यासत्त्य
वच्छिन्नवह्निव्याप्यवत्तानिर्णयाधिकरणोपर्वतत्वे तादृशसंबंधावच्छिन्नकारणतानिरूपि
तकार्यतावच्छेदकीभूतविशेष्यतावच्छेदकतासंबंधावच्छिन्नतादृशकार्यताश्रययत्किंचिद्व
क्तिनिष्ठकार्यतानिरूपितकारणतावच्छेदकीभूतविशेष्यतावच्छेदकत्वसंबंधावच्छिन्नप्र
तियोगिताकवह्निमत्तानिर्णयित्वावच्छिन्नाभावत्वविशिष्टाः सत्वात्तत्र विशेष्यतावच्छेदक
त्वप्रत्यासत्त्या वह्न्यनुमितित्वावच्छिन्नापत्तिरिति चेन्न॥ सामान्यतो वह्न्यनुमितित्वावच्छिन्नं
प्रतिवह्निनिर्णयित्वावच्छिन्नाभावत्वादिना हेतुता न संभवति॥ पुरुषांतरीयपर्वतत्वाव
च्छिन्नविशेष्यकवह्निमत्तानिर्णयकालीनपुरुषांतरीयपर्वतत्वावच्छिन्नविशेष्यकवह्न्यनु
मितेर्व्यभिचारात्॥ किंतु तत्पुरुषीयवह्निविधेयकानुमितित्वावच्छिन्नं प्रति तत्पुरुषीय
वह्निमत्तानिर्णयित्वावच्छिन्नाभावत्वादिना हेतुता वाच्या॥ एवं च चैत्रस्य पर्वतो वह्निमानित्ये
तादृशसिद्धिसत्वेपि वह्निव्याप्यवत्ताज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयीभूततत्पु रामः
रुषांतरीययत्किंचिद्वह्न्यनुमितिनिष्ठकार्यतानिरूपितकारणतावच्छेदकीभूततत्पुरुषीयव 3
ह्निमत्तानिर्णयित्वावच्छिन्नाभावत्वघटितयावद्धर्मावच्छिन्नानां पर्वतत्वे सत्वान्न विशेष्यता
वच्छेदकत्वप्रत्यासत्त्यानुमित्यापत्तेर्भ्रमेणापि वारयितुमशक्यत्वात्॥ तत्पुरुषीयवह्न्यनुमि

तित्वावच्छिन्नं प्रति तत्पुरुषीयवह्निव्याप्यवत्ताज्ञानत्वेन हेतुता तेन चैत्रीयवह्निव्याप्यवत्ता
ज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यताश्रययत्किंचिद्व्यक्तिश्चैत्रीयानुमितिरेव तन्निष्ठका
र्यतानिरूपितकारणतावच्छेदकीभूता यावंतो धर्मास्त्विदं तद्गतं चैत्रीयवह्निमत्तानिर्णयित्वाव
च्छिन्नाभावत्वमपि॥ तदवच्छिन्नस्य चैत्रीयपर्वतत्वावच्छिन्नविशेष्यकवह्निमत्तानिर्णयदशायां
पर्वतावृत्तेः सत्वेन॥ न तदा विशेष्यतावच्छेदकत्वप्रत्यासत्त्यानुमित्यापत्तिरिति विशेष्यता
वच्छेदकत्वसंबंधावच्छिन्नपरामर्शनिष्ठकारणतायामपि तत्पुरुषीयत्वानिवेशनमावश्य
कमिति॥ अत्रेदं समाधानमाकलयामः॥ तद्धर्मावच्छिन्नयत्किंचिद्व्यक्तिनिष्ठयत्संबंधाव
च्छिन्नकार्यतानिरूपितस्वेतरकारणतावच्छेदकीभूताः यावंतो धर्माः प्रत्येकं तदवच्छिन्नकू
टविशिष्टत्वतदधिकरणेतत्संबंधावच्छिन्नतद्व्यक्तिनिष्ठकार्यतानिरूपितस्वावच्छिन्नकार
णताघटकप्रत्यासत्त्याप्रत्यासन्नस्य यत्किंचिद्धर्मावच्छिन्नस्य तद्व्यक्तिनिष्ठयत्संबंधावच्छिन्न
कार्यतानिरूपितस्वेतरकारणतावच्छेदकीभूता यावंतो धर्माः प्रत्येकं तदवच्छिन्नकूटविशि
ष्टं सत्तत्संबंधावच्छिन्नतद्व्यक्तिनिष्ठकार्यतात्वंतरनिरूपितस्वावच्छिन्नकारणताघटकप्रत्या
सत्त्यास्वाधिकरणं यत्र तत्तत्संबंधेन तदधिकरणप्रत्यासन्नस्य तद्धर्मावच्छिन्नस्य तत्संबंधेना
धिकरणमित्येव सामग्रीत्वं निरूपयेयते॥ एवं च चैत्रस्य वह्निव्याप्यवान्पर्वत इत्येतादृशाप
रामर्शकाले पर्वतो वह्निमानित्येतादृशसिद्धिसत्वे पुरुषांतरीयपत्॥ किंचिदनुमितिव्यक्ति

निष्ठसमवायसंबंधावच्छिन्नकार्यतानिरूपितनिखिलकारणतावच्छेदकविशिष्टाधिक
रणत्वेन चैत्रात्मनः॥ तदात्मसमवेतत्वावच्छिन्नं प्रति तादात्म्यप्रत्यासत्त्यात्मत्वेन हेतु
त्वात्तादात्म्यत्वस्याविवक्षया यावत्कारणतावच्छेदकान्तर्गतत्वाच्चैत्रात्मनस्तादात्म्यसंबंधेन
तादात्म्यत्वावच्छिन्नासंबंधित्वात्॥ किंतु चैत्रीययत्किंचिद्व्यनुमितिनिष्ठसमवायावच्छि
न्नकार्यतानिरूपितकारणतावच्छेदकयावद्धर्मविशिष्टविशिष्टत्वमेव तस्मात्तद्व्यक्तिनिष्ठ
विशेष्यतावच्छेदकत्वसंबंधावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकयावद्धर्मविछि
न्नविशिष्टत्वं च न तदा पर्वतत्वस्य॥ द्वितीयविशेष्यतावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताक
चैत्रीयवह्निमत्तानिर्णयत्वावच्छिन्नाभावस्यापि तदंतर्गततया तदवच्छिन्नस्य तदानीं पर्व
तत्वेऽसत्त्वादिति न समवायेन चैत्रसंबंधानुमितेर्विशेष्यतावच्छेदकत्वप्रत्यापर्वतत्वेऽप्र
पत्तिरिति॥ न च समवायेन तत्तदात्मसमवेतत्वावच्छिन्नं प्रति तादात्म्येन तत्तदात्मत्वेन हे
तुतायां मानाभावात् एतादृशरीत्या नापत्तिवारणं संभवतीति वाच्यं॥ विषयाणां तादृशाने
तकारणतायां निवेशणपेक्षया विषयमनिवेश्य तादृशकारणताकल्पनस्यैवोचितत्वादि रामः
तिरुक्तं वागाडंबरेण॥ अथ पक्षतावच्छेदकसमानाधिकरणपमात्रावगाहिहेतुमत्ताज्ञा ५
नात् पक्षतावच्छेदकावच्छेदेनानुमितेरस्तु सत्यापर्वतत्वादिव्यापकत्वसंसर्गकानुमितित्वा
वच्छिन्नं प्रति पर्वतत्वादिव्यापकतासंसर्गकहेतुमत्ताज्ञानत्वेन हेतुता वाच्या॥ इत्थं च वि

शेष्यतावच्छेदकस्य विशिष्यनिवेशस्यानुरूपकतया कृतं तत्र विशेष्यतावच्छेदकत्व
प्रत्यासत्त्यैव निःसंगीकरेण॥ न च विशेष्यतावच्छेदकत्वप्रत्यासत्त्यनभ्युपगमे पर्वतत्व
व्यापकत्वसंसर्गकत्वनिवेशेऽपि पर्वतत्वद्रव्यत्वाद्यनंतधर्मनिवेशेनानंतकारणताः कल्प
नीयाः॥ तदुपगमे च तादृशासंख्येयैकमेवकारणत्वमिति वाच्यं॥ पक्षतावच्छेद
कावच्छिन्नत्वावगाहिहेतुमत्ताज्ञानात्॥ पक्षतावच्छेदकावच्छिन्नत्वावगाहिन्या अनुमि
तेरेवोपपत्तेरिति तथा महानसत्वावच्छिन्नपक्षकपर्वतत्वादिव्यापकत्वावगाहिनो हेतुमत्ता
ज्ञानात् तादृशानुमितेरप्रामाणिकत्वात्॥ मन्मतेऽपि एकैककार्यकारणभावमात्रकल्प
नात्॥ न च पर्वतत्वादिकमनिवेश्य व्यापकत्वसंसर्गकत्वमात्रं कार्यकारणभावे निवेश
नीयमिति वाच्यं॥ पर्वतत्वस्याभावप्रतियोगितानवच्छेदकधर्मविशिष्टत्वरूपव्यापकता
यां निवेशने तद्घटकीभूतपर्वतत्वादेरपि निवेशनावश्यकत्वात्॥ यदि च पर्वतत्वादि
कमनिवेश्य किंचिद्व्यक्तित्वाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावनिष्ठावच्छेद
कतानिरूपितवह्नित्वनिष्ठावच्छेदकतानिरूपकं यद्वह्निनिष्ठावच्छेदकत्वं तन्निरूप
कं यत्संयोगादिसंसर्गनिष्ठावच्छेदकत्वं तन्निरूपकवह्नित्वावच्छिन्नविधेयतानिरूपि
तविशेष्यतावच्छेदकतासंबंधेनानुमितित्वावच्छिन्नं प्रति तादृशाभावनिष्ठावच्छेदक
तानिरूपकधूमत्वनिष्ठावच्छेदकतानिरूपकधूमनिष्ठावच्छेदकतानिरूपकसंयो

गादिनिष्ठावच्छेदकतानिरूपकवह्निव्याप्यधूमत्वावच्छिन्नप्रकारतानिरूपितविशेष्य
तावच्छेदकतासंबंधेन परामर्शस्य हेतुतासंभवात् ॥ तदा महानसत्वव्यापकताघटित
संसर्गाविगाहिनः पर्वतत्वावच्छिन्नविशेष्यकपरामर्शादपि पर्वतत्वावच्छेदेन वह्न्यनु
मितेरापत्तिरिति ॥ अत्र केचित् ॥ तद्धर्मावच्छिन्नविशेष्यताकबुद्धौ तद्धर्मव्यापकताया
एव संसर्गतया भानमभ्युपेयते ॥ नापरधर्मव्यापकतायाः ॥ इत्थं च पर्वतत्वावच्छिन्नवि
शेष्यताकबुद्धौ महानसत्वव्यापकताघटितसंसर्गानवगाहितया उक्तातिप्रसंगो ना
वेनयदि चेत्साध्यपदस्थितिरीतिरेव साधीयसी तदा तु ॥ अन्ये तु वह्नित्वावच्छिन्नविधेय
तानिरूपितसंयोगसंसर्गनिष्ठावच्छेदकतानिरूपितवह्निनिष्ठावच्छेदकतानिरूपि
तवह्नित्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनि
ष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदक
तानिरूपिताधेयत्वनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतावच्छेदक
त्वप्रत्यासत्त्यानुमितित्वावच्छिन्नप्रतिवह्निव्याप्यधूमप्रकारतानिरूपितसंयोगसंस रामः
र्गनिष्ठावच्छेदकतानिरूपितधूमनिष्ठावच्छेदकतानिरूपितधूमत्वनिष्ठावच्छेदकते २
नैसंक्रमेतदवच्छेदकत्वप्रत्यासत्त्या परामर्शस्य हेतुत्वान्तरकल्पनान्नोक्तातिप्रसंगः ॥
न च शुद्धपर्वतत्वं धर्मितावच्छेदकीकृत्य नाव्यपर्वतत्वव्यापकताघटितसंसर्गविहिनः

परामर्शात्तादृशानुमितिव्यापकत्वावगाहिसिद्धिकल्पेऽशुद्धपर्वतत्वव्यापकतासंसर्गकानु
मित्यापत्तिरिति वाच्यं ॥ स्वनिरूपकावच्छेदकतानिरूपितत्वसंबंधेनावच्छेदकताविशि
ष्टान्यायावच्छेदकताया एव प्रत्यासत्तित्वोपगमात् ॥ तादृशस्थले च पर्वतत्वनिष्ठावच्छेद
कतायास्तादृशसंबंधेन वह्नित्वनिष्ठावच्छेदकताविशिष्टत्वेनापत्त्यभावात् ॥ न च सर्वासा
मेवावच्छेदकतानां तादृशसंबंधेन स्वात्मकावच्छेदकताविशिष्टत्वात् तद्व्यावच्छेदकता
प्रसिद्धिरिति वाच्यं ॥ संयोगस्येव स्वनिरूपकावच्छेदकतानिरूपितत्वादेस्तेषामपि स्वस्मिन्
स्वसंबंधत्वानुपगमेनानुपपत्त्यभावात् ॥ न चैवमपि पर्वतवृत्तिघटाभावप्रतियोगिता
नवच्छेदकत्वावगाहिज्ञानात् ॥ पर्वतत्वव्यापकतावगाह्यनुमित्यापत्तिः ॥ आधेयत्वा
तिरिक्तानवच्छिन्नत्वस्याभावनिष्ठावच्छेदकतायां निवेशेऽपि पर्वतवृत्तिः सन् महानस
वृत्तिर्यो ऽभावस्तत्प्रतियोगितानवच्छेदकत्वग्रहात्तादृशानुमित्यापत्तिर्दुर्वारैवेति वाच्यं
॥ आधेयत्वनिष्ठावच्छेदकतायामपि तादृशसंबंधेनाभावत्वान्यनिष्ठावच्छेदकतावि
शिष्टान्यत्वं निवेश्यपतादृशापत्तेर्निरसनीयत्वादित्याहुः ॥ अत्रेयमनुपपत्तिश्चिन्तनीया
॥ यत्र पर्वतत्वं धर्मितावच्छेदकीकृत्य धूमसंयोगेन महानसत्वव्यापकधूमसंयोगे
न वा धूमवत्ताज्ञानमपि ॥ महानसत्वं च धर्मितावच्छेदकीकृत्य पर्वतत्वव्यापकताविशि
ष्टधूमसंयोगेन धूमवत्ताज्ञानमपि च तत्र पर्वतत्वं धर्मितावच्छेदकीकृत्य पर्वतत्वव्याप

कीर्त्तत्ववन्हिसंयोगेनवन्ह्यनुमित्यापत्तिः॥विशेष्यतावच्छेदकत्वमसामस्त्यानिरुक्तावच्छे
दकत्वप्रत्यासन्नाचपर्वतत्वेधूमपरामर्शप्रमत्वादिति॥अत्रोच्यते॥तादृशावच्छेदक
तासंबंधेनानुमितिंप्रतिधूमप्रकारताविशिष्टायाविशेष्यतातदवच्छेदकत्वसंबंधेनप
रामर्शत्वेहेतुः॥विशेष्यतायांधूमप्रकारतावैशिष्ट्यंचस्वनिरूपितसंयोगनिष्ठसांस
र्गिकविषयतानिरूपितायाधूमनिष्ठावच्छेदकतातन्निरूपितायाधूमत्वनिष्ठावच्छेद
कतातन्निरूपितायावन्हिनिष्ठावच्छेदकताइत्येवंक्रमेणअधिकरणनिष्ठावच्छेदक
तापर्यंतंनिवेश्यतदवच्छेदकावच्छिन्नत्वस्वनिरूपितत्वोभयसंबंधेननिवेश्यं॥उपर
त्रितिस्थलेचपर्वतत्वावच्छिन्नविशेष्यतानतादृशोभयसंबंधेनधूमप्रकारताविशि
ष्टा॥तत्रमहानसत्वव्यापकताविशिष्टधूमसंयोगस्यैवपर्वतत्वावच्छिन्नविशेष्यता
निरूपितधूमप्रकारतावच्छेदकतयायादृशाधूमप्रकारतानिरूपितत्वंपर्वतत्वावच्छि
न्नविशेष्यतायांपरंपरयातादृशाधूमप्रकारतानिरूपितायाधिकरणनिष्ठावच्छेदक
तातवच्छेदकत्वस्यमहानसत्वएवसत्वात्पर्वतत्वावच्छिन्नविशेष्यतायांस्वतदवच्छि रामः
न्नत्वाभावादितिपर्वतोवेनतादृशाधूमप्रकारताविशिष्टविशेष्यतावच्छेदकतासंबंधे ६
नपरामर्शोविरहइतिनतत्रतादृशावच्छेदकतासंबंधेनानुमित्यापत्तिरिति॥अथवि
शिष्यविशेष्यतावच्छेदकमनिवेश्यनिर्णयित्वस्यदुर्वचतयातन्निवेशस्यावश्यक

ताइतिविशेष्यतावच्छेदकताप्रत्यासत्तिकल्पनलाघवावकाशः॥तथाहि॥वन्हिव्याप्यधूम
वत्तानिर्णयित्वंयदिधूमाभावप्रकारताशून्यत्वेसतिधूमप्रकारत्वंतदामहानसंधूमाभाववत्
पर्वतोवन्हिव्याप्यधूमवानित्येतादृशज्ञानासंग्रहः॥तादृशज्ञानस्यापिमहानसत्ववि
शिष्टेधूमाभावप्रकारकत्वात्॥नापिवन्हिव्याप्यधूमप्रकारतानिरूपितविशेष्यतावच्छे
दकावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताश्रयान्यत्वेसतिवन्हिव्याप्यधूमप्रका
रकत्वं॥तादृशज्ञानीयधूमाभावप्रकारतायामपिमहानसत्वावच्छिन्नविशेष्यकधूम
वत्ताज्ञानीयधूमप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्व
सत्वेनतस्यैवासंग्रहात्॥तानीयतादृशाविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपि
तधूमाभावप्रकारतानाक्रान्तत्वतादात्म्योभयसंबंधेनधूमाभाववत्ताज्ञानविशिष्टान्यत्वनिवेशे
पिवन्हिव्याप्यधूमवत्त्वाभावमहानसंवन्हिव्याप्यधूमवान्पर्वतइत्येतादृशज्ञानासंग्रहः॥
तस्यतथाविधोभयसंबंधेनस्वात्मकधूमाभाववत्ताज्ञानविशिष्टत्वात्॥अथपर्वतत्व
वच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशून्यत्वस्यावच्छिन्नविशेष्यतानिरूपि
तधूमप्रकारताक्रान्तत्वोभयसंबंधेनकिंचिद्धर्मविशिष्टज्ञानत्वमेवनिर्णयित्वं॥वन्हि
व्याप्यधूमवत्त्वाभावमहानसंवन्हिव्याप्यधूमवान्पर्वतइत्येतादृशासमूहालंबनस्यचनि
रुक्तोभयसंबंधेनपर्वतत्वविशिष्टत्वान्नतदसंग्रहः इतिचेत्॥अस्त्वेतादृशज्ञाननिर्णयित्वं

समूहालंबनसाधारणं विशिष्य विशेष्यतावच्छेदकमनिवेश्य सुवचं ॥ तथापि तादृशरू-
पेण हेतुत्वं न संभवति ॥ तथा सति तादृशसमूहालंबनात्मकनिर्णयस्य वह्निव्याप्यधूम-
प्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन ममहानसत्वे सत्वात् तदनंतरं महा-
नसं वह्निमदित्याद्यनुमित्यापत्तेः ॥ एवं च तादृशसमूहालंबनव्यावृत्तरूपस्य तेन कता-
वच्छेदकत्वे तदुत्तरं तत्साधारणरूपस्य तथात्वे चोक्तातिप्रसंग इति कथंचिदपि न निस्ता-
र इति ॥ स्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशून्यत्व स्वावच्छिन्नविशेष्य-
तानिरूपितधूमप्रकारताशालित्व एतदुभयसंबंधावच्छिन्नस्वनिष्ठाधिकरणतानिरू-
पकत्वसंसंबंधेन परामर्शत्वेन कारणता ॥ यद्वा स्वीयधूमाभावप्रकारतानिरूपित-
विशेष्यतावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकस्वाभाववत्व ॥ स्वीयधूमप्रकारता-
निरूपितविशेष्यतावच्छेदकत्व एतदुभयसंबंधेन परामर्शत्वेन कारणता इति तन्नि-
स्तार इति चिंत्यं ॥ अत्र केचित् ॥ एतन्न क्लृप्तकारणतावच्छेदककोटौ निर्णयित्वं न निवेश्य-
ते ॥ किंतु संशयानंतरमनुमित्यापत्तिवारणाय कारणतावच्छेदकप्रत्यासत्तिघटकधू- संप्रः
माभावप्रकारतानिरूपितविशेष्यतायां धूमाभावादिप्रकारत्वानिरूपितत्वं निवेश्यते ॥ ७
तथा च धूमाभावप्रकारत्वानिरूपितधूमप्रकारतानिरूपितविशेष्यतावच्छेदकताप्र-
त्यासत्त्याश्रयज्ञानत्वेनैव हेतुता ॥ न च प्रकारत्वेन विशेष्यतात्वेन चानिखिलज्ञानीय

धूमप्रकारतानिरूपितविशेष्यतानामेव धूमाभावप्रकारत्वानिरूपितत्वात्तादृशविशेष-
णमनावश्यकमेवेति वाच्यं ॥ संशये प्रकारतात्वेन विशेष्यतात्वेन चानभ्युपगमात् ॥ न चोभय-
प्रकारतानिरूपितविशेष्यतायाः संशयातिरिक्तज्ञानेऽक्लृप्तत्वात् संशयेऽतिरिक्तविषय-
ताकल्पनप्रसंग इति वाच्यं ॥ प्रत्येककोटिकज्ञानीयविशेष्यतातः अतिरिक्ताया विशे-
ष्यतायाः संशयेऽनभ्युपगमे संशयसमुच्चययोर्वैलक्षण्यानुपपत्तेः कल्पनावश्यक-
त्वात् ॥ न च समुच्चयाविषयस्य कोट्योः परस्परविरोधस्य संशयगोचरतयैव तस्य समु-
च्चयवैलक्षण्योपपत्तेरतिरिक्तविषयतायां मानं इति वाच्यं ॥ विरोधोपस्थितिं विनापि विशे-
षादर्शनि कोटिस्मारणधर्मिज्ञानादितः संशयस्यानुभवसिद्धतया निखिलसंशयानां वि-
रोधविषयकत्वासंभवात् ॥ अत एव दीधितिकारेणापि क्वचिद्विरोधज्ञानस्यापि तत्प्रयोज-
काधीनत्वादित्यत्र क्वचिदित्युक्तं परं तु संशये विरोधस्य कोट्यधिकरणयोः संसर्गघटकत-
येव भानोपगमात् तत्संसर्गज्ञानस्य च विशिष्टबुद्धौ हेतुत्वान्निखिलसंशयानामेव विरोधवि-
षयकत्वं संभवतीति किमतिरिक्तविषयताकल्पनेनेति ॥ तदसत् ॥ संसर्गविधया वि-
रोधविषयतायाश्च प्रामाणिकत्वात् ॥ संशयसमुच्चययोर्वैलक्षण्यान्यथानुपपन्नात-
त्कल्पने तु किमपराद्धमुभयप्रकारतानिरूपितविशेष्यतया ॥ अथ निखिलानां संशया-
नां न उभयप्रकारतानिरूपितैकविशेष्यताशालित्वं न संभवति ॥ नीलघटवत्तत्वं धर्मितावच्छे-

रकीकृत्य वह्निव्याप्यधूमाभाववं शुद्धपर्वतत्वं धर्मितावच्छेदकीकृत्य च तदवच्छेदेन वह्निव्याप्य
धूममवगाहमानस्य संशयस्य तथात्वायोगात्॥ तत्र धूमप्रकारतानिरूपितविशेष्यतायाः
नीलानवच्छिन्नत्वात्॥ तदवच्छिन्नधूमाभावप्रकारतानिरूपितविशेष्यतातो भिन्नत्वात्॥
तत्र धूमप्रकारतानिरूपितविशेष्यताया नीलानवच्छिन्नत्वोपगमे॥ नीलत्वशुद्धपर्वतत्वं
धर्मितावच्छेदकीकृत्योभयकोटिमवगाहमानस्य संशयस्य तत्तोवैलक्षण्यानुपपत्तेः॥ न च
तत्र धूमप्रकारतानिरूपितविशेष्यतातो धूमाभावप्रकारतानिरूपितनीलविशिष्टप
र्वतत्वावच्छिन्नविशेष्यताभिन्नैवास्ति परं तु नीलपर्वतत्वावच्छिन्नविशेष्यतायास्तु धूम
प्रकारतानिरूपितशुद्धपर्वतत्वावच्छिन्नविशेष्यताया अपि धूमाभावप्रकारतानिरूपि
तत्वं स्वीक्रियत इति नानुपपत्तिरिति वाच्यं॥ तथा सति तादृशसंशयात् शुद्धपर्वतत्वं ध
र्मितावच्छेदकीकृत्योभयकोटिमवगाहमानस्य संशयस्य वैलक्षण्यानुपपत्तेः॥ विरोधि
सामग्रीदशायां नीलपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशालिज्ञानं
जायतामित्येतादृशेच्छासत्वे तादृशज्ञानानुदयप्रसंगाच्च॥ शुद्धपर्वतत्वावच्छिन्नविशेष्य
तानिरूपितधूमाभावप्रकारताशालिप्रत्यक्षं पर्वतत्वावच्छिन्नविशेष्यतानिरूपित रामः ८
धूमाभावप्रकारताशालिज्ञानं जायतामित्येतादृशेच्छां तादृशेच्छायास्तद्रूपेणोत्तेजकीकृ
त्य विरोधिसामग्र्याः प्रतिबंधकता कल्प्यतां तादृशेच्छासाधारणोत्तेजकत्वे तथाविधेच्छा

सत्वे नीलत्वासकसामग्रीसत्वे शुद्धपर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यधूमाभावप्रकारक
प्रत्यक्षापत्तेः॥ न च नीलपर्वतो धूमाभाववान् पीतपर्वतो धूमवानित्याकारकसमूहाल
म्बनवत् नीलपर्वतो धूमाभाववान् पर्वतो धूमवानित्येतादृशज्ञानमपि न संशय इति वा
च्यं॥ तस्य निर्णयत्वे कार्यकाले पर्वतत्वावच्छेदेन धूमवत्तानिर्णयस्य विरोधिनः सत्वान्नील
पर्वतत्वं धर्मितावच्छेदकीकृत्यापि धूमाभाववत्ताज्ञानानुदयप्रसंगादिति चेत्॥ मैवं॥ हेतो
श्च संशयेषूभयप्रकारतानिरूपिता एकैव विशेष्यता किं तु तस्याः पर्वतत्वावच्छिन्नत्वेन
धूमप्रकारतानिरूपितत्वं नीलावच्छिन्नत्वविशिष्टपर्वतत्वावच्छिन्नत्वरूपेण धूमाभाव
प्रकारतानिरूपितत्वमिति विशेषः॥ नीलपर्वतो धूमवान्न वेत्यादिसंशयेऽपि विशेष्यता
याश्च एकरूपेणैवोभयप्रकारतानिरूपितत्वमिति तेषां वैलक्षण्योपपत्तिरित्याहुः॥
अत्रेदं विभावनीयं॥ संशयसमुच्चययोर्वैलक्षण्योपपत्तये उभयप्रकारतानिरूपिता
तिरिक्तं विषयत्वं चास्मिन् संशये॥ किं तु तत्र प्रत्येकप्रकारतानिरूपितविशेष्यताद्वयस
त्वेऽपि बाधकाभावः॥ तत्प्रयोजकसामग्र्या अपि तत्र सत्वात् न च तदवच्छिन्नं प्रति संश
यं सामग्र्याः प्रतिबंधकत्वकल्पनात् तत्प्रयोजकसामग्र्येव तत्र नास्तीति वाच्यं॥ तत्र
संशयसामग्र्याः प्रतिबंधकत्वे मानाभावात्॥ न च प्रत्येकप्रकारतानिरूपितविशेष्य
ताद्वयस्य संशये स्वीकारे संशयात् समुच्चयस्य वैलक्षण्यानुपपत्तिस्तस्मात्तत्र विष

यतायास्सत्त्वाभावात् इति चेन्नन्यथानुपपत्त्याभावात् तादृशसामग्रीप्रतिबंधकत्वकल्पनमिति वाच्यं॥
संशयविलक्षणविषयतायाः समुच्चये सत्त्वेपि संशयनिष्ठविलक्षणविषयतायां सत्त्वाभा
वेनैव तस्य संशयवैलक्षण्योपपत्तेः॥ संशयमात्रवृत्तिरूपविशेष्यताशालित्वरूपवैलक्षण्यं
समुच्चये तु रूपद्वयस्यत्वच्छायथमंतरेणानाश्वासः इति॥ एवं च धूमादिसंशयस्यापि धू
माभावप्रकारत्वानिरूपितधूमप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन पर्व
तत्वादेः सत्वात् ततोनुमित्यापत्तिर्दुर्वारैव॥ एतेन निखिलसंशयेषु विरोधः संसर्गतया
भासते तेनान्यत्र॥ तथा च विरोधानवच्छिन्नसंयोगनिष्ठसांसर्गिकविषयतानिरूपितधू
मप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन परामर्शस्येह हेतुत्वकल्पनान्न सं
शयानंतरमनुमित्यापत्तिरित्यपि परास्तं॥ संशयस्य विरोधावच्छिन्नसंयोगादिसंस
र्गकत्वेपि शुद्धसंयोगावच्छिन्नधूमादिप्रकारताशालित्वे बाधकाभावात्तदनंतरमनुमि
त्यापत्तेर्दुर्वारिणासंभवात् विरोधघटितसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्य
ताया एककोटिकज्ञानसाधारण्याभावात् विरोधस्य संसर्गतयाभानेमानाभावात्॥ सं
शयमात्रे विरोधस्य संसर्गतयाभानोपगमे उभयप्रकारतानिरूपिततादृशविशेष्यतयो गंभ. ९
रनेकस्यैव कल्पयितुमुचितत्वाच्च॥ संयोगादिनिष्ठावच्छेदकतायां नानापदार्थघटितवि
रोधानवच्छिन्नत्वनिवेशनमपेक्ष्य धूमप्रकारतानिरूपितविशेष्यतायामभावप्रकार

तानिरूपितत्वनिवेशस्यैव युक्तत्वात् तत्रोपदर्शितायाश्चानुमित्यापत्तेः प्रकृतेपि तुल्य
त्वादित्यलमसदाग्रहेण॥ इदं तु चिंत्यं॥ बाधोत्पत्तिकाले विशिष्टबुद्धेरापत्तिवारणाय ज्ञा
यमानाव्यवहितोत्तरोत्पत्तिकत्वसंबंधेन तदभावप्रकारकज्ञानाभावविशिष्टत्वावच्छि
न्नं प्रति तदभावप्रकारकज्ञानसामग्र्यभावत्वेन हेतुत्वकल्पनात्॥ आपत्तिवारणं
तु तद्धेतुत्वप्रकारकज्ञानसामग्र्यभावादिघटितसंशयसामग्र्याश्च तत्त्वासहकारि
त्वकल्पनात्तादृशविलक्षणविषयताशालिबुद्धित्वावच्छिन्नं प्रति तस्यैव नियामकत्व
कल्पनात्॥ नचैतादृशविषयतायाः कार्यतानवच्छेदकत्वेन तदवच्छिन्नं प्रति नियामक
त्वमेव कथं कल्पनीयमिति वाच्यं॥ तादृशविषयताविशिष्टं प्रति प्रत्यासत्त्वेनैव हेतुत्वकल्प
नात्॥ नन्वेतादृशकार्यकारणभावकल्पने गौरवमिति वाच्यं॥ अनंतकारणतावच्छेद
ककोटिप्रवेशतत्सामग्रीप्रतिबंधकतावच्छेदककोटौ तन्निवेश्य तच्छरीरनिर्वचनेन लाघवा
त्॥ किंचित्तु॥ स्वरूपकज्ञाननिरूपितत्वस्वावच्छिन्नकावच्छिन्नत्वोभयसंबंधेन धूमाभाव
प्रकारताविनिरूपितविशेष्यताविशिष्टाया विशेष्यतातदन्यधूमप्रकारतानिरूपितवि
शेष्यतावच्छेदकत्वं कारणताघटकमस्मासन्निः॥ वह्निव्याप्यधूमवान् वा पर्वत इत्यादि
संशयात्मकज्ञानीयधूमप्रकारतानिरूपितविशेष्यतायास्तथाविधोभयसंबंधेन तदी
धूमाभावप्रकारताविशिष्टत्वेति नानुपपत्तिः॥ निर्णयात्मकज्ञानीयविशेष्यतायाश्च

पित्वावच्छेदकावच्छिन्नत्वसंबंधेन संशयात्मकज्ञानीयधूमाभावप्रकारतानिरूपितवि
शेष्यताविशिष्टत्वात् स्वनिरूपकज्ञाननिरूपितमहानसपर्वतेऽनिवेशः॥ ज्ञाने भेदेन
च विशेष्यताभेदोपगमात्तानुपपत्तिः॥ धूमवन्नवा महानसं धूमवान्नपर्वत इत्येतादृश
ज्ञानीयधूमप्रकारताविरूपितपर्वतनिष्ठविशेष्यतायाः स्वनिरूपकज्ञाननिरूपित
त्वसंबंधेन तदीयधूमाभावप्रकारतानिरूपितमहानसत्वावच्छिन्नविशेष्यताविशिष्टत्वा
त्॥ स्वावच्छेदकावच्छिन्नत्वनिवेशः॥ अथ यत्र नीलपर्वतत्वावच्छेदेन धूमाभावं शुभ्रपर्वत
त्वसामानाधिकरण्येन धूममवगाहमानः समूहालंबनबोधस्तदुत्तरं पर्वतो वन्हिमानि
त्येतादृशानुमित्यनुपपत्तिः॥ तादृशज्ञानीयधूमप्रकारतानिरूपितविशेष्यतायास्त
दीयधूमाभावप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नतयाऽन्यसंबंधेन ता
दृशविशेष्यताविशिष्टत्वात्॥ न च धूमाभावप्रकारतानिरूपितविशेष्यतायां धूमाभा
वत्वानवच्छिन्नप्रकारतानिरूपितयत्किंचिद्धर्मावच्छिन्नविशेष्यताभिन्नत्वनिवेशान्ना
नुपपत्तिः॥ तादृशज्ञानीयधूमाभावप्रकारतानिरूपितविशेष्यताया धूमाभावत्वान रांम
वच्छिन्ननीलप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यत्वाभिन्नत्वादिति वाच्यं॥ एवं १०
सति नीलपर्वतत्वावच्छेदेन धूमाभावप्रकारकात् शुभ्रपर्वतत्वावच्छेदेन धूमप्रकारकसं
शयादपि अनुमित्यापत्तिरिति चेन्न॥ अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य सामाना

धिकरण्येन हेतुमत्ताज्ञानस्य च साधारणरूपेणैकहेतुत्वं सामानाधिकरण्यप्रत्यासत्तिकल्प
नसंभवतात्यत्र प्रपंचितं एवं चावच्छेदकावच्छेदेन हेतुमत्ताज्ञाने हेतुतायां तादृशविशे
ष्यताभिन्नत्वाविशेषितधूमाभावप्रकारतानिरूपितविशेष्यताविशिष्टान्यत्वमेव धूमप्र
कारतानिरूपितविशेष्यतायां निवेशनीयं॥ अतो नोक्तसंशयादनुमित्यापत्तिः॥ सामाना
धिकरण्यावगाहिता न हेतुतायां तु तादृशविशेष्यताभिन्नविशेष्यताविशिष्टान्यत्वं निवेश
नीयं॥ अतो नोपदर्शितसमूहालंबनादनुमित्यनुपपत्तिरिति॥ न चैवं नीलपर्वतत्वावच्छे
देन धूमाभावप्रकारात् तत्सामानाधिकरण्येन च धूमप्रकारात् संशयादनुमित्यापत्तिरिति वा
च्यं॥ धूमप्रकारतानिरूपितविशेष्यतायामपि धूमान्यप्रकारतानिरूपितकिंचिद्धर्माव
च्छिन्नविशेष्यताभिन्नत्वस्य निवेशनात्॥ न चैवं नाद्य पर्वतो वन्हिव्याप्यवानित्याकारकपरा
मर्शादनुमित्युदयप्रसंग इति वाच्यं॥ तादृशपरामर्शान्नीलपर्वतो वन्हिमानित्या
कारकानुमितेरेव॥ वोत्पत्त्या तादृशस्थले च नीलप्रकारतानिरूपितविशेष्यत्वाभिन्नव
न्हिविधेयतानिरूपितविशेष्यतावच्छेदकतासंबंधेनानुमितित्वावच्छिन्नं प्रति नीलप्र
कारतानिरूपितविशेष्यत्वाभिन्नवन्हिव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदक
त्वप्रत्यासत्त्या परामर्शस्य हेत्वंतरकल्पनस्यावश्यकत्वात्॥ तत्र च वन्हिव्याप्यधू
मप्रकारतानिरूपितायां नीलानीलानवच्छिन्नप्रकारतात्वन्निरूपितकिंचिद्धर्मावच्छिन्न

विशेष्यतानिरूपकत्वस्यैव विशेष्यतायां निवेशनीयतया अनुपपत्त्यभावात्॥ नीलपर्वतो
वह्निमानित्येतादृशानुमितिस्थले हेतुतांतरकल्पनायामर्थवन्नरूपकत्वं च नीलो वह्निव्या
प्यवान् पर्वतो वह्निव्याप्यवानित्यादिसमूहालंबनानंतरं नीलपर्वतो वह्निमानित्य
नुमित्यापत्तिवारणाय॥ यत्तु विशेष्यतावच्छेदकत्वप्रत्यासत्तिकुक्षौ तादृशसमूहा
लंबनान्नीलपर्वतो वह्निमानित्येतादृशानुमित्यापत्तिर्न संभवति स्वावच्छेदकतापर्या
प्त्याश्रयत्वसंबंधेनानुमितिं प्रति तादृशसंबंधेन परामर्शस्य हेतुत्वात् तादृशसमूहालं
बनज्ञानीयविशेष्यतावच्छेदकतायाः विशिष्टपर्याप्त्यभावात् तन्मात्रानुमितिविशे
ष्यतावच्छेदकतायाः विशिष्टपर्याप्तत्वासंभवादिति॥ तु विशिष्टस्यानतिरेकेण शुद्धमात्र
॥ यथा अवच्छेदकतापर्याप्त्यवच्छेदकतासंबंधेनानुमितिं प्रति तादृशसंबंधेनैव प
रामर्शस्य हेतुता॥ नीलपर्वतो वह्निमानित्यादौ च नीलपर्वतत्वोभयत्वावच्छेदेन वि
शेष्यतावच्छेदकतायाः पर्याप्तिरिति तादृशसंबंधेन तथाविधानुमितिः॥ तादृशो
भयत्व एवोत्पद्यते॥ तथा च तत्र न संभवति॥ एतादृशोभयत्वस्य तथा॥ पराम रामः
र्शीयविशेष्यतावच्छेदकतापर्याप्त्यनवच्छेदकत्वादिति चेत्॥ अस्त्वेवमापाततः॥ एवम ११
पि पर्वतत्वविशिष्टनीलावच्छिन्नविशेष्यकपरामर्शात्तादृशानुमित्यापत्तिर्दुर्वारैव॥
॥ तादृशपरामर्शीयविशेष्यतावच्छेदकतायाः उभयत्वावच्छेदेनैव पर्याप्तत्वात्॥ व

स्तुतस्तु॥ अवच्छेदकतायाः व्यासज्यवृत्तित्वस्य निरस्तत्वात् नीलपर्वतो वह्निमानित्यादिता
न विशेष्यतावच्छेदकतायाः अपि प्रत्येकपर्याप्ततया तादृशप्रकारोऽनंतासंभवदुक्तिकए
वेत्यलमसद्ग्रहेण॥ स्वावच्छेदकावच्छिन्नत्वमित्यत्र स्वावच्छेदकत्वं निरवच्छिन्नं ग्राह्यं॥ अ
तो न जातिमान् धूमाभाववान् पर्वतो धूमवानिति ज्ञानादनुमित्यनुपपत्तिः॥ न चैवं जातिमा
न् वह्निव्याप्यवानत्र वा इत्याकारकपरामर्शादपि अनुमित्यापत्तिरिति वाच्यं॥ जातिमान् व
ह्निव्याप्यवानित्यादिनिर्णयात् पर्वतो वह्निमानित्याद्यनुमितिवारणाय निरवच्छिन्नविशेष्य
तावच्छेदकतासंबंधेनानुमितिं प्रति तादृशावच्छेदकतासंबंधेनैव परामर्शस्य हेतुता
याः कल्पनात्॥ तादृशांशेऽयस्थलेपि तत एव तादृशानुमित्यापत्तिवारणसंभवात्॥
जातिमान् वह्निव्याप्यवानित्यादौ समानविशेष्यतावच्छेदकताप्रत्यासत्त्या कार्यकारण
भावांतरकल्पनाच्च जातिमान् वह्निव्याप्यवानित्यादिनिर्णयकाले जातिमान् वह्निमानि
त्याद्यनुमित्यनुदयप्रसंगः स्यादिति॥ अत्र च ज्ञानव्यक्तिभेदेन विषयताभेदानभ्युपगमे
निर्णयात्मकज्ञानीयविशेष्यतायामपि न तादृशोभयसंबंधेन विशेष्यताविशिष्टान्यत
मित्यनुपपत्तिरशक्यसमाधानैव॥ इदं पुनरत्रानिरहस्यमनुसंधेयम्॥ विशेष्यतावच्छे
दकतासंबंधेनानुमितिं प्रति स्वीयवह्निव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेद पर्वतत्व
कत्वस्वनिष्ठभेदप्रतियोगितानिरूपितस्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्र

कारताकत्वसंबंधावच्छिन्नावच्छेदकत्वेनान्यसंबंधेनपरामर्शेहेतुः॥ वह्निव्याप्यधूमवत्त्र
वा महानसं वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शस्य स्वावच्छिन्नविशेष्यतानिरूपि
तधूमाभावप्रकारताकत्वसंबंधेन पर्वतत्वाभाववत्वे तेन तादृशसंबंधावच्छिन्नपर्वतत्व
निष्ठप्रतियोगितावच्छेदकताकभेदवत्वात् स्वनिष्ठभेदप्रतियोगितानिरूपिततादृश
संबंधावच्छिन्नावच्छेदकताकभेदवत्वात् स्वनिष्ठभेदप्रतिघटितोन्यसंबंधेनासौ पर्व
तत्वे वर्त्तत इत्यनेन तद्युत्तरं पर्वतो वह्निमानित्यनुमित्यप्रसंगः॥ एवं तस्य स्वावच्छिन्नवि
शेष्यतानिरूपितधूमाभावप्रकारतानिरूपितत्वसंबंधेन महानसत्वविशिष्टत्वान्नतादृ
शोऽन्यसंबंधेनासौ वर्त्तत इति न तस्मात् महानसं वह्निमदित्याकारकानुमित्यापत्तिः॥
प्रतियोगितावच्छेदकत्वं निरवच्छिन्नं ग्राह्यं॥ तेन पर्वतो वह्निव्याप्यधूमवान्नवा इत्यादि
निखिलसंदेहोनामेव तादृशसंबंधेन पर्वतत्वमहानसत्वोभयाद्यवच्छिन्नभेदवत्वेन क्ष
तिः॥ तादृशभेदप्रतियोगितावच्छेदकतायाऽन्यतराद्यवच्छिन्नत्वात्। नच तादृशधर्म
विशेषधर्मितावच्छेदकीकृत्य कदाचिदपि धूमाभाववत्त्वाज्ञानेन जातं तादृशधर्मनिष्ठ
निरुक्तसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदाप्रसिद्ध्या तत्रैतेनान्यसंबंधे रामः
नपरामर्शाभावयतितद्धर्मावच्छिन्नविशेष्यताकानुमित्यनुदयप्रसंग इति वाच्यं॥ ताद १२
शानुमित्यनुरोधेन स्वावच्छेदकावच्छिन्नत्वसंबंधेन धूमाभावप्रकारतानिरूपितविशे

ष्यताविशिष्टान्यविशेष्यतावच्छेदकत्वप्रत्यासत्त्या परामर्शस्य हेतुत्वकल्पनादिति। अथ विशे
ष्यतावच्छेदकताप्रत्यासत्तिकल्पे हेतुतावच्छेदकीभूतधूमत्वालोकत्वादीनां विशिष्य निवेशा
वश्यकतया तत्र तेन कारणतावाहुल्यं॥ तथाहि॥ धूमत्वालोकत्वादीनां विशिष्याऽनि
वेशे स्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबंधेन किंचिद्धर्मावच्छिन्नप्र
तियोगिताकव्याप्याभावप्रकारतानिरूपितविशेष्यताविशिष्टान्यव्याप्यप्रकारतानिरू
पितविशेष्यतावच्छेदकताप्रत्यासत्त्या ज्ञानभेदेन विषयताभेदाभ्युपगमे। तदनभ्युपगमे
तु॥ स्वीयव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदकत्वस्वनिष्ठभेदप्रतियोगितानिरूपि
तस्वावच्छिन्नविशेष्यतानिरूपितकिंचिद्धर्मावच्छिन्नप्रतियोगिताकव्याप्यत्वाभावप्रकारताक
त्वसंबंधावच्छिन्नावच्छेदकत्वोभयसंबंधेन परामर्शस्य हेतुता वाच्या॥ तथा च वह्निव्याप्यत्वो
काभाववान् वह्निव्याप्यधूमवांश्च पर्वत इत्यत्र तादृशज्ञानानादनुमित्यनुदयप्रसंग इति॥ धूम
त्वादीनां विशिष्य निवेशानावश्यकं॥ सामानाधिकरण्यप्रत्यासत्तिकल्पे तु न हेतुतावच्छे
दकभेदेन कारणतावाहुल्यं॥ विशिष्य हेतुतावच्छेदकमनिवेश्यैव स्वनिरूपितप्रतियोगि
तासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबं
धेन पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपिताभावप्रकारताविशिष्टान्याया पर्वतत्वाद्यवच्छि
न्नविशेष्यतानिरूपितव्याप्यप्रकारतानच्छालितज्ञानत्वरूपवह्निव्याप्यवत्ताज्ञानत्वेनता

नत्वेदेन विषयतानेदाऽनुपगमे॥ तदनभ्युपगमे तु स्वावच्छिन्नप्रतियोगिताकाभावप्रकारतानि
रूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगितावच्छेदकताक
भेदवत्त्वस्वावच्छिन्नव्याप्यप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्वोभयसंबं
धेन किंचिद्धर्मविशिष्टज्ञानत्वरूपवन्हिव्याप्यवत्तानिर्णयित्वेन पर्वतत्वाद्यवच्छिन्नविशेष्य
ताकवत्यनुमितित्वाभावछिन्नं प्रतिहेतुत्वसंभवात्॥ एवं च हेतुतावच्छेदकविशेष्यता
वच्छेदकयोस्तुनाधिकतावस्थासर्वत्रैतु: परिछेद्यतया विशेष्यतावच्छेदकताप्रत्यासत्ति
कल्पेलाघवानवकाश इति चेत्॥ मैवं॥ हेतुतावच्छेदकभेदेन परामर्शस्य हेतुत्वकल्पन
मेवोचितं॥ अन्यथा वन्हिव्याप्यधूमाभाववानयमित्यादिसाधारणप्रतिबध्यव्यतिरेक
निर्णयिविधया वन्हिव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानां हेतुत्वांतरकल्पने गौरवात्
॥मन्मते अनुमितिस्थले वन्हिव्याप्यधूमवत्तानिर्णयित्वादिना हेतुत्वकल्पने विषयम
तिवेरूपतादृशापन्नानुमितिसाधारणवन्हिव्याप्यधूमादिमत्तानिर्णयिविशिष्टत्वस्यज रंभः १३
न्यतावच्छेदकत्वोपगमादेतादृशकार्यकारणभावेनैवोपपत्तेरतिरिक्तकारणताया
स्तत्राकल्पनात्॥ अथवा एतन्मतेपि हेतुतावच्छेदकमनिवेश्यैव स्वावच्छेदकावच्छि विशेषत
त्वस्वनिरूपकज्ञाननिरूपितत्वस्वनिरूपिताभावविषयतानिरूपितप्रतियोगिता
संसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नप्रकारतानिरूपितत्वैतत्त्रितयसंबंधेन विशे

ष्यताविशिष्टायाविशेष्यतानदन्यवन्हिव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदकत्वप्रत्या
सत्त्याज्ञानत्वेनैव हेतुताकल्प्यते॥ प्रथमदलप्रवेशाद्धूमाभाववन्महानसं वन्हिव्याप्यधूम
वान्पर्वत इत्येतादृशज्ञानीयपर्वतविशेष्यताया नासंग्रहः॥ द्वितीयदलप्रवेशात्त्रिखिल
ज्ञानीयपर्वतादिविशेष्यतायास्तद्घटितसंबंधेन ज्ञानांतरीयधूमाभावादिप्रकारतानि
रूपितपर्वतादिविशेष्यताविशिष्टत्वेपि नक्षतिः॥ तृतीयदलप्रवेशादालोकाभाववान्व
न्हिव्याप्यधूमवांश्चपर्वत इत्याकारकसमूहालंबनज्ञानीयधूमप्रकारतानिरूपितपर्वत
विशेष्यतायाः स्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबंधेनालोकाभावप्र क
कारतानिरूपितविशेष्यताविशिष्टत्वेपि नक्षतिः॥ तादृशविशेष्यतायामालोकाभावप्र
कारतानिरूपितविशेष्यतानिरूपिताभावविषयतानिरूपितप्रतियोगिप्रकारतावच्छे
दकालोकत्वावच्छिन्नप्रकारतानिरूपितत्वाभावेन तादृशत्रितयसंबंधेनालोकाभावप्रका
रतानिरूपितविशेष्यतावैशिष्ट्यात्प्रकारतानिरूपितविशेष्यतानदवच्छेदकत्वमेव परानम
भ्युपगमात्प्रत्यासत्तिः॥ विशेष्यत्वाभावश्च स्वावच्छेदकावच्छेद्यत्वस्वनिरूपिताभावविषयतानि
रूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितत्वोभ
यसंबंधावच्छिन्नप्रतियोगिताको ग्राह्यः॥ वन्हिव्याप्यधूमाभाववन्महानसं वन्हिव्याप्यधूम
वान्पर्वत इत्येतादृशज्ञानीयपर्वतविशेष्यतायां तदीयमहानसविशेष्यतायाः॥ स्वावच्छे

दकावच्छेद्यत्वात्सत्वात्॥ वह्निव्याप्यालोकाभाववान् वह्निव्याप्यधूमवांश्च पर्वत इत्येतादृशज्ञा
नीयपर्वतविशेष्यतायां च तदीयालोकाभावप्रकारतानिरूपितपर्वतविशेष्यतायाः चर
मत्वासत्वात् तादृशोभयसंबंधावच्छिन्नप्रतियोगिताकस्वीयविशेष्यत्वाभावविशिष्टत्व
मक्षतमेव॥ सर्वांशे निश्चयात्मकवह्निव्याप्यधूमवान् पर्वत इत्याकारकज्ञानीयधूमप्र
कारतानिरूपितविशेष्यतायां तादृशज्ञानीयविशेष्यतायास्तादृशसंबंधावच्छिन्नाभा
वो व्यधिकरणसंबंधावच्छिन्नाभाव एवेत्यवधेयं॥ न चात्र धूमविशेष्यतात्वावच्छिन्नप्रति
योगिताकाभावो निवेश्यापि तु मन्तव्यः॥ तथाहि॥ वह्निव्याप्यधूमवान् पर्वत इत्यादिनि
र्णयविशेष्यतायां संशयात्मकज्ञानीयविशेष्यतायास्तादृशसंबंधेन सत्वाद्विशेष्यतात्व
रूपसामान्यधर्मावच्छिन्नप्रतियोगिताकस्वविशेष्यत्वाभावासत्वात्॥ तत्र ज्ञानीयविशे
ष्यतात्वावच्छिन्नाभावत्वेन तादृशाभावं निवेश्य तत्र ज्ञानहेतुत्वे चाननुगम इति विशेष्य
ताप्रतियोगिकाभावत्वेनैव तादृशाभावा निवेशनीयाः इष्टं च संशयात्मकज्ञानीयवि
शेष्यतायामपि तादृशज्ञानीयाभावप्रकारतानिरूपितविशेष्यतायाः द्वित्वादिना तादृ
शोभयाभावसत्वादतिप्रसंग इति वाच्यं॥ निरूपितत्वसंबंधावच्छिन्नस्वनिष्ठावच्छेदकता रामः
निरूपकीभूतविशेष्यतावृत्तिप्रतियोगिताकाभावत्वेन तादृशाभावानां निवेशात्॥ उ २४
भयत्वावच्छिन्नाभावप्रतियोगितायां च निरूपितत्वसंबंधेन स्वस्यानवच्छेदकतया तादृशा
भावमादायातिप्रसंगाभावात्॥ अथैवमपि तज्ज्ञानीयपूर्वक्षणादिवृत्तित्वविशिष्टविशे

ष्यत्वाभावमादायातिप्रसंगो दुर्वारः॥ तादृशप्रतियोगितायां तज्ज्ञानस्यापि अवच्छेदकत्वात्
॥ न चावच्छेदकतावृत्तितया तत्र ज्ञानस्य प्रतियोगितावच्छेदकत्वं न संभवति॥ किंतु पूर्वक्षण
वृत्तित्वनिष्ठावच्छेदकतायामेव निरूपितत्वघटितसामानाधिकरण्यसंबंधेनावच्छेदकत्वं
तस्येति न दोष इति वाच्यं॥ पूर्वक्षणवृत्तित्वनिष्ठावच्छेदकतायाः तादृशसंबंधेन तज्ज्ञानम
वच्छेदकं तज्ज्ञाननिष्ठप्रतियोगितावच्छेदकतायां स्वपूर्वक्षणवृत्तित्वमवच्छेदकमित्यत्र विनि
गमनाविरहेण तज्ज्ञानस्यापि तत्रावच्छेदकत्वादिति चेन्न॥ स्वनिष्ठावच्छेदकतायां किंचिद
वच्छिन्नावच्छेदकत्वानिरूपकत्वस्यापि निवेशेन ज्ञाननिष्ठतादृशाभावप्रतियोगितावच्छेद
कतायां पूर्वक्षणवृत्तित्वत्वाद्यवच्छिन्नावच्छेदकतानिरूपकत्वेन तादृशाभावमादायातिप्र
संगाभावादिति कृतं पल्लवितेन॥ अथ विशेष्यतावच्छेदकताप्रत्यासत्त्या परामर्शस्य हेतु
त्वोपगमे अन्यलिंगकानुमितौ हेतुतावच्छेदकमनिवेश्य पक्षमालोकादिलिंगकपरामर्शा
नामेकरूपेण हेतुत्वे भिन्नसंबंधघटितव्याप्त्यवगाहिपरामर्शजन्यानुमितौ व्यभिचारो
दुर्वारः॥ तथाहि॥ एतन्मते विशेष्यतावच्छेदकमनिवेश्य संयोगसंसर्गकवह्निव्याप्यधू
मवत्ताज्ञानोत्तरं वह्निविधेयकानुमितित्वादिकमिव संयोगसंसर्गकधूमादिपरामर्शज
न्यतावच्छेदकं वाच्यं॥ तथा च महानसत्वाद्यवच्छिन्नविशेष्यकसंयोगसंबंधावगाहिधू
मादिमत्ताज्ञानोत्तरोत्पन्नायाः समवायसंबंधावगाहिवह्निव्याप्यरूपविशेषवान् पर्व

न इत्येतादृशपरामर्शजन्यपर्वतत्वाद्यवच्छिन्नविशेष्यकानुमितेरपि संयोगसंसर्गकवह्नि
व्याप्यधूमवत्तानिर्णयाव्यवहितोत्तरोत्पत्तिकानुमितित्वरूपधूमपरामर्शजन्यतावच्छेदकाक्रां
तया विशेष्यतावच्छेदकत्वमप्यासत्त्या तदधिकरणीभूते पर्वतत्वे धूमप्रकारतानिरू
पितविशेष्यतावच्छेदकत्वरूपकारणतावच्छेदकत्वस्याप्यासत्त्या संयोगसंसर्गावगाहि
धूमपरामर्शरूपकारणासत्त्वेन व्यभिचारः॥ न च मतद्वयमते पुरुषान्तरीयपर्वतलिंगकपरा
मर्शाव्यवहितोत्तरक्षणोत्पत्तिकान्यलिंगकानुमितौ व्यभिचारवारणाय स्वसामानाधि
करण्यस्वाव्यवहितोत्तरक्षणो॥ उत्पत्तिकत्वोभयसंबंधेन धूमपरामर्शादिमत्त्वनिवेशा
नवद्यं तन्मतेपि स्वीयधूमादिप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्य
ताकत्वस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन तादृशविशिष्टत्वं कार्यतावच्छेद
ककोटौ निवेश्यान्यधर्मावच्छिन्नविशेष्यकसंयोगसंबंधावगाहिधूमादिपरामर्शाव्य
वहितोत्तरोत्पन्नपर्वतत्वावच्छिन्नपक्षकान्यलिंगकानुमितौ व्यभिचारो वारणीय इति
वाच्यं॥ एवमपि वह्निव्याप्यधूमवान् महानसं वह्निव्याप्यरूपविशेषवान् पर्वत इत्यादि शंप:
समूहालंबनजन्यायां महानसं वह्निमत्पर्वतो वह्निमानित्येतादृशसमूहालंबनानुमि १५
तेरुपदर्शितोभयसंबंधेन धूमत्वाविशिष्टाया विशेष्यतावच्छेदकतया पर्वतत्वेप्युत्प
त्तेस्तत्र धूमप्रकारतानिरूपितविशेष्यतावच्छेदकतया परामर्शासत्त्वेन व्यभिचारस्य

दुर्वारत्वात्॥ अत्र केचित्॥ स्वनिरूपकज्ञानाव्यवहितोत्तरक्षणोत्पन्नानुमितिनिरूपितत्व
स्वावच्छेदकावच्छिन्नत्वोभयसंबंधेन संयोगसंबंधावच्छिन्नवह्निव्याप्यधूमादिप्रकारतानिरू
पितविशेष्यताविशिष्टविशेष्यतानिरूपितत्वस्वावच्छेदकत्वं कार्यतावच्छेदकप्रत्यासत्तिः ता
दृशसमूहालंबनानुमितिनिरूपितपर्वतत्वावच्छिन्नविशेष्यतायां तादृशधूमप्रकारता
निरूपितविशेष्यतानिरूपकपरामर्शाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिनिरूपितत्व॥
न तादृशविशेष्यतावच्छेदकावच्छिन्नत्वमतो नोपदर्शितोभयसंबंधेन तादृशविशेष्यतावि
शिष्टासत्त्वं॥ अपितु महानसत्वावच्छिन्नविशेष्यतैव तथेति नानुपपत्तिः॥ तादृशानुमिति
निरूपितपर्वतत्वावच्छिन्नविशेष्यतायाश्चापि स्वावच्छेदकावच्छिन्नत्वसंबंधेन समवायांत
रीयपर्वतत्वावच्छिन्नविशेष्यताकधूमपरामर्शनिरूपिततादृशविशेष्यताविशिष्टत्वा
त् प्रथमदलप्रवेशः॥ तादृशसमूहालंबनात्मकपरामर्शीयमहानसत्वावच्छिन्नविशे
ष्यतायाः स्वनिरूपकज्ञानाव्यवहितोत्तरक्षणोत्पन्नानुमितिनिरूपितत्वसंबंधेन वैशि
ष्ट्यमतादृशसमूहालंबनानुमितिनिरूपितपर्वतत्वावच्छिन्नविशेष्यतायां सत्त्वाच्चरम
दलप्रवेशादित्याहुः॥ अत्र च ज्ञाननेदीय — मेन विषयताभेदे एव निस्तारः॥ अन्यथा ता
दृशानुमितिनिरूपितपर्वतत्वावच्छिन्नविशेष्यतायास्तथाविधोभयसंबंधेन धूमप्र
कारतानिरूपितविशेष्यताविशिष्टायाः पर्वतत्वावच्छिन्नपक्षकधूमलिंगकपरामर्श

तन्यानुमितिविशेष्यता नदभिन्नत्वेन व्यभिचारस्य वारयितुमशक्यत्वात्॥ अन्ये तु॥ समवाय
प्रत्यासत्तिकत्वे समवायसंबंधघटितसामानाधिकरण्यस्याव्यवहितोत्तरक्षणोत्पत्तिकत्वो
भयसंबंधेन परामर्शवैशिष्ट्यनिवेशान वदंतस्तेपि धूमादिप्रकारतानिरूपितविशेष्यता
वच्छेदकत्ववन्हिविधेयतानिरूपितविशेष्यतावच्छेदकत्वघटितसामानाधिकरण्यस्या
व्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन तादृशपरामर्शवित्त्वमेव धूमादिपरामर्शजन्य
तावच्छेदकं निवेशयंते॥ एवं च वन्हिव्याप्यधूमवन्महानसं वन्हिव्याप्यरूपविशेषवान्प
र्वत इत्येतादृशसमूहालंबनजन्यायाः पर्वतत्वमहानसत्वोभयावच्छिन्नपक्षकानुमिते
स्तादृशोभयसंबंधेन धूमपरामर्शवत्वेपि तादृशविशिष्टनिरूपितमधिकरणत्वं
न पर्वतत्वस्य॥ सामानाधिकरण्यसंबंधेन एकविशिष्टापराधिकरणतायाः सामाना
धिकरण्यशरीरे विशेषणस्य यादृशः संबंधः प्रविष्टस्तेन संबंधेन यद्विशेषणाधि
करणत्वं तन्नियतत्वात्॥ पर्वतत्वस्य च तादृशसामानाधिकरण्यघटकीभूतेतादृश
धूमप्रकारतानिरूपितविशेष्यतावच्छेदकत्वरूपविशेषणसंबंधेन विशेषणीभूत रामः
तादृशावधूमपरामर्शानधिकरणत्वात्॥ अतः पर्वतत्वे तादृशधूमप्रकारतानिरूपि १६
तविशेष्यतावच्छेदकतासंबंधेन परामर्शासत्त्वेपि न व्यभिचारः॥ कार्यतावच्छेदकवि
शिष्टाधिकरणत्वस्याभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपनियतत्वघटकव्या

पकतायाएव कारणतायां निवेशनेन कारणतावच्छेदकनिष्ठस्यतादृशाभावप्रतियो
गितानवच्छेदकत्वस्यैव व्यभिचारत्वात्॥ तस्माच्च प्रकृते सत्तादिनाहुः॥ स्वाव्यवहितपूर्वक्षण
वृत्तिज्ञानीयसंयोगावच्छिन्नधूमप्रकारतानिरूपितविशेष्यतावच्छेदकत्वस्वीयवन्हिविधे
यतानिरूपितविशेष्यतावच्छेदकत्वोभयसंबंधेनानुमितिं प्रति संयोगावच्छिन्नवन्हिव्याप्य
धूमप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन परामर्शत्वेन हेतुता॥ उपदर्शि
तसमूहालंबनानुमितिश्च वन्हिविधेयतानिरूपितविशेष्यतावच्छेदकत्वमात्रेण पर्व
तत्ववत्त्वे तेन तु तादृशोभयसंबंधेन तत्र तदनुमित्यव्यवहितपूर्ववृत्तिज्ञानीयधूमप्र
कारतानिरूपितविशेष्यतावच्छेदकत्वाभावात्॥ अतः पर्वतत्वे संयोगावच्छिन्नधूम
प्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन परामर्शासत्त्वेपि न व्यभिचार इ
त्यायं पुनरस्माकीनः पंथाः॥ स्यादेतत्॥ पक्षतावच्छेदकभेदेन नानाविधाप्रामाण्य
ज्ञानाभावानां पृथक् पृथक् निवेशानुरोधात्तत्र भेदेन परामर्शहेतुताभेदश्चावश्यकः
॥ अन्यथा इदं ज्ञानं धूमाभाववति पर्वते धूमप्रकारकं इदं ज्ञानं धूमाभाववति महानसे धूम
प्रकारकं इत्याद्याकारकनिखिलाप्रामाण्यग्रहाणामभावस्य एकत्र निवेशाप्रसंगेन इ
दं ज्ञानं धूमाभाववति महानसे धूमप्रकारकमित्यप्रामाण्यग्रहदशायां पर्वतत्वावच्छि
न्नविशेष्यकधूमपरामर्शसत्त्वे यथाविधानुमित्यनुदयापत्तेः॥ न च पर्वतत्वावच्छिन्नपक्षे

कधूमादिपरामर्शानंतरं धूमाभाववति पर्वते धूमप्रकारकमित्याकारकाप्रामाण्यज्ञा
नमेवोत्पद्यते ।। तादृशाप्रामाण्यग्रहाणां पर्वतत्वादिविशिष्ट धूमाभावावगाहितया तत्र
बाधबुद्ध्या तादृशपरामर्शाणां प्रतिबंधकत्वादिति तादृशाभावानां जनकतावच्छेदकको
टौ निवेश एव नास्तीति वाच्यं ।। पर्वतत्वादिसामानाधिकरण्येन धूमाद्यवगाहिपरामर्शानंत
रं तत्सामानाधिकरण्येन धूमाभावावगाहिनस्तादृशाप्रामाण्यग्रहस्योत्पादे बाधकाभा
वात् ।। अथ वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शदशायां तज्ज्ञानीयधूमप्रकारतात्व
सामानाधिकरण्येन धूमाभाववन्महानसविशेष्यतानिरूपितत्वावगाहिभ्रमत्वग्रह
सत्त्वे पर्वतत्वावच्छिन्नविशेष्यकानुमित्यनुत्पादमापाद्यसि किं वा तादृशप्रकारतात्वावच्छे
देन तादृशविशेष्यतानिरूपितत्वावगाहिभ्रमग्रहसत्त्वे ।। तत्र नाद्यः पक्षः ।। वह्निव्याप्यधूम
वन्महानसमित्येतादृशपरामर्शदशायां तज्ज्ञानीयधूमप्रकारतात्वसामानाधिकरण्येन
धूमाभाववन्महानसविशेष्यतानिरूपितत्वावगाहिभ्रमत्वग्रहसत्त्वेपि महानसत्वावच्छि
न्नविशेष्यकानुमित्युत्पत्त्या विशेष्यतावच्छेदकावच्छेदेन तादृशविशेष्यतानिरूपितत्वप्र
कारकग्रहस्यैवाभावनिवेशात् ।। नाप्यंत्यः ।। तज्ज्ञानीयधूमप्रकारतात्वावच्छेदेन महान रामः
सत्वाद्यमिश्रितधूमाभाववद्विशेष्यतानिरूपितत्वप्रकारकग्रहदशायामिव धूमाभाव १७
वन्महानसविशेष्यतानिरूपितत्वग्रहदशायामपि पर्वतो वह्निमानित्य तादृशानुमि

त्युदयस्येष्टत्वात् ।। तथाहि ।। जनकतावच्छेदकीभूतप्रकारतायां तत्प्रकाराभाववद्विशे
ष्यतानिरूपितत्वग्रहसत्त्व एवानुमितिर्नोत्पद्यत इत्यनुभवसिद्धं ।। तादृशविशेष्यतानि
रूपितत्वभानं च तथाविधाभाववति महानसत्वादेरधिकस्याभानदशायामप्युक्तमेवे
ति चेत् ।। सत्यमेवैतत् ।। एवमपि विशेष्यतावच्छेदकताप्रत्यासत्तिकल्पे धूमाभाववद्वृ
त्तिधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वधूमाभाववद्वृत्तिधूमप्रका
रतानिरूपितमहानसत्वावच्छिन्नविशेष्यताकत्वादिरूपनानाविधाप्रामाण्यग्रहा
भावानामेकत्र निवेशनीयतया वह्निव्याप्यधूमवान्पर्वतः वह्निव्याप्यधूमवन्महा
नसमित्याकारकसमूहालंबनात्मकपरामर्शे धूमाभाववद्वृत्तिधूमप्रकारतानिरूपि
तमहानसत्वावच्छिन्नविशेष्यताकत्वरूपाप्रामाण्यग्रहसत्त्वे पर्वतो वह्निमानित्याद्या
कारानुमितेरनुपपत्तिः ।। तत्र च तादृशानुमितिः सर्वानुभवसिद्धैव ।। न ह्येकधर्माव
च्छिन्नविशेष्यतायां प्रकाराभाववद्वृत्तित्वग्रहेऽन्यधर्मावच्छिन्नविशेष्यकानुमितिरपि
नोत्पद्यत इति कश्चिदभ्युपैति ।। अत्र केचित्तु अप्रामाण्यग्रहाभावस्य परामर्शीयज
नकतायामवच्छेदकत्वोपगम एवायं दोषः ।। तदेव न ।। पर्वतत्वावच्छिन्नविशेष्यक
धूमलिंगकवह्न्याद्यनुमितिं प्रति धूमाभाववद्वृत्तिधूमप्रकारतानिरूपितपर्वतत्वा
वच्छिन्नविशेष्यताकत्वप्रकारकग्रहत्वावच्छिन्नाभावत्वेन तस्य प्रयोजकहेतुत्वमुपे

पते॥ न चाप्रामाण्यग्रहाभावस्य पक्षतावच्छेदकभेदेन हेतुत्वमायपरामर्शस्य च पुरुषभेदे
न कारणत्वांतरस्य कल्पनापेक्षया पक्षतावच्छेदकभेदेनाप्रामाण्यग्रहाभावविशिष्टपरा
मर्शस्यैव हेतुत्वकल्पनमुचितमिति वाच्यं॥ तथा सति तत्पक्षविशेषणविशिष्टाभावविनिगमना श्री
विरहेण पक्षतावच्छेदकसमसंख्यकार्यकारणभावानां गुरुत्वप्रसंगात्॥ पक्षतावच्छेदक
भेदेनाप्रामाण्यग्रहाभावानां पुरुषभेदेन च परामर्शानां हेतुत्वकल्पनायामौचित्या
दित्याहुः॥ परे तु॥ स्वीयधूमाभाववद्वृत्तित्वप्रकारतानिरूपिताया धूमप्रकारतानिरूपित
विशेष्यत्वनिष्ठविशेष्यतातन्निरूपितावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्व
संबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टपरामर्शत्वेन हेतुताकल्पनान्ना
नुपपत्तिः धूमप्रकारतानिरूपितमहानसत्वावच्छिन्नविशेष्यतायां धूमाभाववद्वृत्तित्वग्रहद
शायामपि तादृशसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टपरामर्शस्य
पर्वतत्वे सत्त्वात्॥ अभाववैशिष्ट्यं च परामर्शविशेषणताविशेष्यतावच्छेदकत्वघटित
सामानाधिकरण्यसंबंधेन॥ अथैवं धूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यता
वच्छिन्नत्वेन धूमाभाववद्वृत्तित्वग्रहदशायामपि पर्वतो वह्निव्याप्यधूमवान् महानसं च व रंगः
ह्निव्याप्यधूमवदित्याकारकसमूहालंबनपरामर्शात्पर्वतो वह्निमानिति तादृशानुमि १८
त्यापत्तिः॥ महानसत्वांतर्भावेन तादृशसामानाधिकरण्यसंबंधेनाप्रामाण्यग्रहाभावविशि

ष्टस्य परामर्शस्य विशेष्यतावच्छेदकतासंबंधेन पर्वतत्वे सत्त्वादिति चेन्न॥ तादृशपरा
मर्शस्य महानसत्वांतर्भावेनाप्रामाण्यग्रहाभावविशिष्टत्वेऽपि न तद्विशिष्टपरामर्शनिरूपि
तमधिकरणत्वं पर्वतत्वस्य सामानाधिकरण्यनिरूपकाधिकरणस्यैव सामानाधिकरण्य
संबंधेनैकविशिष्टापराधिकरणत्वात्॥ इत्थं च कारणतावच्छेदकविशिष्टनिरूपिताया
धिकरणताया एव कार्योत्पादकप्रयोजकतया तच्छून्ये पर्वतत्वेन विशेष्यतावच्छेदकता
संबंधेनानुमित्यापत्तिः॥ अस्तु वा तादृशसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभा
वविशिष्टविशेष्यतावच्छेदकत्वमेव कारणताघटकसंबंधः॥ उपदर्शितस्थले च॥ पर्वतत्व
निष्ठविशेष्यतावच्छेदकतायाः सामानाधिकरण्यसंबंधेन तादृशाप्रामाण्यग्रहाभावविशि
ष्टतयानोपदर्शितकारणताघटकसंबंधेन पर्वतत्वे परामर्शोऽस्तीति नानुपपत्तिः॥ अथवा
विशेष्यतावच्छेदकतासंबंधेनानुमितिं प्रति तादृशसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्य
ग्रहाभावस्य परामर्शस्य हेतुत्वमित्याहुः॥ एतेषु कल्पेषु हेतुतावच्छेदकभेदेन परामर्शस्य हेतु
ताभेदश्चावगम्य इति ध्येयं॥ तदसंदिग्धतायां पुनरेतदवधेयं॥ ज्ञानीयविशेष्यतावृत्ति
विशेष्यताभावविशिष्टायां व्याप्यप्रकारतानिरूपितविशेष्यतातदवच्छेदकत्वे प्रत्यासत्त्या
परामर्शो हि हेतुः॥ विशेष्यताभावस्वनिरूपितावच्छिन्नत्वनिष्ठावच्छेदकतावच्छेदकधर्माव
च्छिन्नत्वस्वनिरूपितनिरूपितत्वैतत्त्ववच्छेदकतानिरूपितप्रकारतात्वावच्छिन्नावच्छेदकता

निरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपित
त्वस्वनिरूपिताधेयत्वप्रकारतानिरूपिताधिकरणप्रकारतानिरूपितानावप्रकारता
निरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारकावच्छेदकधर्मावच्छिन्नप्रकारतानिरू
पितत्वेतन्त्रितयसंबंधावच्छिन्नप्रतियोगिताकोऽयाभावः॥ तथैवविशिष्टचविशेषणतावि
शेषेणवह्निव्याप्यधूमवान्पर्वतइत्येतादृशपरामर्शदशायांधूमप्रकारतानिरूपित
पर्वतत्वावच्छिन्नविशेष्यतात्वावच्छेदेनधूमाभाववच्छत्वेत्वस्यइसत्येतादृशपरामर्श
यधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायांनतादृशविशेष्यत्वाभावे
शिष्टंतदानीउपदर्शिततित्रितयसंबंधेनतादृशप्रामाण्यज्ञानीयविशेष्यतायाःधूम
प्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायांसत्वात्॥ प्रतियोगितावच्छेदकसं
बंधेप्रथमदलाप्रवेशेधूमप्रकारतानिरूपितमहानसत्वावच्छिन्नविशेष्यतात्वावच्छे
देनधूमाभाववद्वृत्तित्वग्रहदशायामपितादृशपरामर्शीयधूमप्रकारतानिरूपितपर्व
तत्वावच्छिन्नविशेष्यतायांतादृशप्रामाण्यज्ञानीयमहानसत्वावच्छिन्नविशेष्यतावृत्ति
विशेष्यतायाःस्वसंबंधघटकेनसत्त्वात्पर्वतोवह्निमानित्यनुमितेरनुदयापत्तिरतःप्रथम रामः १९
दलप्रवेशः॥ नचविशेषणताविशेषनिवेशेनैवोपपत्तौगुरुतरप्रथमदलप्रवेशोनि
रर्थकः॥ उपदर्शितप्रामाण्यज्ञानीयमहानसत्वावच्छिन्नविशेष्यतावृत्तिविशेष्यता

याविशेषणताविशेषेणमहानसत्वावच्छिन्नविशेष्यतायामेवसत्वात्तद्घटितत्रितयसं
बंधावच्छिन्नप्रतियोगिताकतदभावस्यपर्वतत्वावच्छिन्नविशेष्यतायांसत्वादितिवाच्यं
विशेषणताविशेषंघटितत्रितयसंबंधावच्छिन्नाभावस्यनिवेशेधूमप्रकारतानिरू
पितपर्वतत्वावच्छिन्नविशेष्यतात्वेनयत्किंचिद्विशेष्यतामात्रविषयीकृत्यतद्रूपस्या
वच्छेदकत्वावगाहीत्वप्रामाण्यग्रहेऽतस्तत्रपर्वतत्वावच्छिन्नविशेष्यत्वेविशेषणता
विशेषघटितसंबंधावच्छिन्नतादृशज्ञानीयविशेष्यत्वाभावसत्वात्पर्वतोवह्निमानित्य
नुमित्यापत्तिः॥ एवंद्वितीयदलाप्रवेशेप्रामाणकप्रकारतानिरूपितपर्वतत्वावच्छिन्नवि
शेष्यत्वावच्छेदेनधूमाभाववद्वृत्तित्वावगाहि— ज्ञानीयपर्वतत्वावच्छिन्नविशेष्यतावृत्ति
विशेष्यतायामपिप्रथमचरमसंबंधाभ्यांवह्निव्याप्यप्रकारतानिरूपितपर्वतत्वावच्छि
न्नविशेष्यतायाःसत्वात्तादृशज्ञानकालेवह्निव्याप्यधूमवान्पर्वतइत्येतादृशपरामर्शा
दनुमित्यनुदयापत्तिरतस्तन्निवेशनम्॥ तृतीयदलाप्रवेशेधूमप्रकारतानिरूपितप
र्वतत्वावच्छिन्नविशेष्यतात्वावच्छेदेनालोकाभाववद्वृत्तित्वावगाहिज्ञानीयपर्वतत्वावच्छि
न्नविशेष्यतावृत्तिविशेष्यतायामपित्र्याधीनत्रयसंबंधेनधूमप्रकारतानिरूपितपर्वत
त्वावच्छिन्नविशेषतायांसत्वात्तादृशज्ञानकालेउपदर्शितपरामर्शा— मित्यनुद— प
त्तिरतस्तन्निवेशनं॥ अ— त्सर्वस्वया— हनीयंसुधीभिरिति॥ अत्रवदंति॥ उपदर्शितवि

शेष्यतावच्छेदकनिष्ठप्रत्यासत्त्याऽनुमितिपरामर्शयोः कार्यकारणभावः कल्प्यते उपत
विधेयतावच्छेदकनिष्ठप्रत्यासत्त्या वा ॥ विधेयतावच्छेदकनिष्ठनिप्रत्यासत्त्याधिकार्यस्य प
र्वतत्वावच्छिन्नविशेष्यतानिरूपितविधेयतावच्छेदकत्वं कारणस्य च पर्वतत्वावच्छिन्नवि
शेष्यतानिरूपितं धूमादिप्रकारतानिरूपितव्याप्तिनिष्ठावच्छेदकतानिरूपितं निरूपित
त्वसंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वं ॥ विशेष्यतावच्छेदकताप्रत्यासत्तिकल्पे विशे
ष्यतावच्छेदकभेदेन एतत्कारो विधेयतावच्छेदकभेदेन कार्यकारणभावभेदानावत्तु ला
घवं ॥ विशेष्यतावच्छेदकविधेयतावच्छेदकयोस्तु नाधिकभावस्यासत्त्वेतु परिच्छेद्यः ॥
न च विनिगमनाविरहादुभयप्रत्यासत्त्यैवं कार्यकारणभावः स्वीक्रियत इति वाच्यं ॥ तथा स
ति विशेष्यतावच्छेदकविधेयतावच्छेदकभेदेन कार्यकारणभावभेदस्यादरूपकतया लाघ
वा— वकाशेन द्वयनिष्ठप्रत्यासत्तेरेवोचितत्वात् ॥ न च विधेयतावच्छेदकं नो विशिष्यानि व
शेषवद्विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या कार्यकारणभावः कल्प्यतोऽस्तु तेन तदुभयभेदेन
कारणतावाहुल्यमिति वाच्यं ॥ तथा सति— वह्निव्याप्यधूमवद्द्रव्यमालोकव्याप्यवान् पर्वत रामः
इत्याद्याकारकसमूहालंबनपरामर्शात् द्रव्यत्वधर्मितावच्छेदकालोकत्वावच्छिन्न २०
—पर्वतत्वधर्मितावच्छेदकीकृताच वह्नित्वावच्छिन्नानुमितिप्रसंगात् ॥ द्रव्यत्वं ॥ ॥

इति परामर्शवादस्त्रुटितः समाप्तः